ष्णगीतानितच्चलचरितानिच।जग्मुःसदेवयानैःनैकैःउद्धवेनवृ
जांगनाः।।४२।।यदुपुर्यास्ततोदूरंउद्यानवनराजयः।।अघघ्नस्यं
प्रपन्नानांसहस्राख्येनंदनेवने।।४३।।द्वारवत्यानुगमनात्पतोल
क्ष्मीपतेस्तदा।।अशेषकल्मषवान्मुक्ताविधूतास्ताशेषबंधनात्।।४४ ।।७०।।
।।संप्राप्तास्तास्ततःसर्वाःश्रीरमायासरस्यथ।।उद्धवःप्रणिपत्या।
शुगोपिकाःसहस्रदेवताः।।४५।।स्थीयतामत्रमेतातत्रत्येष्यतिमहा

नुजः।।सहस्रःकमलपत्राक्षोविधास्यतिसदोदितं।।४६।।गोप्यऊ।।
कस्योद्धवइमंचारुसरःसारसशोभितं।।संपूर्णंपंकजैःपत्रैःकल्हा
रकुमुदोत्पलैः।।४७।।उद्धवउ।।मयोनाममहादैत्योमायावीलोक
विश्रुतः।।सतेतेनसरःसृष्टंतस्यनाम्नाचविश्रुतं।।४८।।गोप्यऊ।।
शीघ्रमानयगोविंदंसाधुदर्शयवाच्युतं।।नयनानंदजननेपीतापत्र
यविनाशनं।।४९।।तच्छ्रुत्वावचनंतासांगोपिकानांतथोद्धवः।।धूतैः
समानयामाससहस्रंसशीघ्रंयायिभिः।।५०।।आयांतेशीघ्रयानेनदृष्ट्वा
देवकिनंदनं।।भ्राजमानंस्ववपुषावनमालाविभूषितं।।५१।।हुलत्कि
रीटमुकुटंस्फुरन्मकरकुंडलं।।श्रीवत्सांकमहाबाहुंपीतकौशेयवा
ससं।।५२।।आतपत्रसहस्रैस्तुसंभृतंसहस्रपुंगवैः।।संस्तुतंबंदिमु

र्वैश्च गीतवादित्रनिःस्वनैः॥५४॥ पौरजानपदैर्लोकैर्वैष्णवैः सर्वतो
वृतः सपत्रपनदंसमित्पुत्रैः सरःसारसञ्छोभितोऽतेहं दृष्ट्वा चुतमाया
ते लोककौतमनोज्ञवे॥५५॥ प्रियं प्रियाश्चिरं दृष्ट्वा मुमुदुस्ता व्रजां
गनाः॥ चिरास्संज्ञामवापुस्ता विलापमुपचक्रिरे॥५६॥ दीनाय
हा कीतहास्ता मिनदा व्रजेशमनोहरा सर्वदुहितोसियै बास्यैक्री
डितोवस्स बलकैः॥५७॥ तेपि च यापरित्यक्ताः कथं पुस्यितिसद्गतिं॥
प्रेम्णसिनिर्घृणः ततेधर्मो नि सौहार्दं न सत्यं सख्यमेव वा॥५८॥ पितृ
मातृपरित्यागात्कथं यास्यति सद्गतिं स्वामिनश्च क्षणपरित्यागः ॥७२॥
सर्वशास्त्रेषु गर्हितः॥५९॥ त्यजतात्मान्वने वीर तच्चेनावेहि
ते च या॥६०॥ श्रुक्रोदद्यु॥ कृत्वा तासां विलपितं गोपीनां नंदनंदनः

नोऽश्रनन्यशरणाः सर्वास्तावज्ञो भगवान्विभुः॥६१॥ प्रोवाच सौच
यन्सर्वा व्रजेशस्ता व्रजांगनाः॥ अध्यात्मविशिष्ट या गोप्यः प्रभुस्ता
अन्वशिक्षयन्॥६२॥ श्रीभगवानुवाच॥ भवतीनां वियोगो मे कस्
दाचिदपि नैव हि॥ वसामि हृदये शश्वद्भूतानामविशेषतः॥६३॥
अहं सर्वस्य प्रभवो मत्तो देवाः सवासवाः॥ आदित्यवसवो रुद्राः
साध्या विश्वे मरुद्गणाः॥६४॥ ब्रह्मा विष्णुश्च रुद्रश्च शक्तिराद्या महा
देव्यः॥ इंद्रियाणि मनो बुद्धिस्तथा सत्त्वरजस्तमः॥६५॥ कामक्रोध
श्च लोभश्च मोहदंकारएव च॥ एतत्सर्वमशेषेण मत्तो गोप्यः प्रव
र्त्तते॥६६॥ एतत्ज्ञात्वा महाभागा मा स्म शोके मनः कृथाः॥ सर्वभू
तेषु मां नित्यं चिंतयध्वमकल्मषाः॥६७॥ सस्त्रस्य वचनं श्रुत्वा गो

ध्यो विध्वस्तबंधनाः॥ विमुक्तसंशयाः क्लेशाद्दर्शनानंदसंप्लुताः॥६७॥ अ
कृवन्गोपवधूस्त्याः सस्तनिर्मलदर्शनाः॥ अघनः सफलं जन्म अ
घनः सफलादृशः॥६८॥ यत्त्वां पश्याम गोविंद नागरीजनवल्लभं
पुण्यहीना न पश्यंति संसारेव्यं पुरुषं परं॥६९॥ कोकैस्तु हेतुसंयुतै
र्दिसे वीक्षितास्तु यां॥ तथापि मायया हृदयानापैति मधुसूदन॥७०॥
श्रीसूत उ॥ दर्शनाद्धि सरस्यास्य निर्मुक्ताशेषबंधनाः॥ स्नानाच्च
सकलान्कामान् वाप्स्यथवुंजागनाः॥७१॥ जोप्युवाच॥ अत्यद्भुतः
प्रभावस्तेसरसोस्य उदाहृतः॥ विधिं ब्रूहि जगन्नाथ विस्तरादृक्षि
नेदन॥७२॥ श्रीसूत उ॥ भवतीनां च मया साधु मघसे जातदर्शनि ॥७२॥
तस्मान्मया सदा ध्येत्र स्नातव्यं नियमेन हि॥७३॥ यः स्नाचापरया

भक्त्यापि च न संतर्पयिष्यति॥ श्रावणस्य सितपक्षे वा दश्यां नियत
शुचिः॥७४॥ दद्याद्दानं स्वशक्त्या च मामुद्दिश्य तथापि च॥ लभते वै
स्स वैलोकं वा दश्यां नियतः शुचिः॥७५॥ दद्याद्दानं स्वशक्त्या च मामु
दिश्य तथापि च॥ लभते वैस्स वैलोक पितृभिः परिवारितः॥७६॥ ग
हांधकूपे पतितं मायापाशैर्वतं॥ मामुद्धर महानाथ गृहाणार्घं नमो
मोस्तु ते॥७७॥ स्नात्वा चाप्यपरया भक्त्यापि च न संतर्पणवतः॥ ऊयात
श्राद्धं च परयापि च न भक्त्या समाहितः॥७८॥ दक्षिणां च ततो दद्यात
रज्जतं रुक्मकं मेव च॥ विशेषतः प्रदातव्यं पायसं शर्वशमधु॥७९॥
नवनीतं तथाछत्रं कंबलाजिनमेव च॥ इति श्रीब्रह्मांडपुराणोक्तसंहि
तायां द्वारकामाहात्म्ये मायासरमाहात्म्यं नामाध्यायः॥ श्रीब्रह्मांड उ

इति हंसवचः श्रुत्वा गोप्यः संहृष्टमानसाः ॥ तत्र मायासरे स्नात्वा विनि
र्मुक्ताशेषबंधनाः ॥१॥ हंसदर्शनसंजातपरमाह्लादसंप्लुताः ॥ तमू
चुर्वचनं गोप्यो मधुरं माधवं प्रति ॥२॥ धन्यः स दैत्यप्रवरो मयो येन नि
र्मितं सरः ॥ यदि दृष्टोसि भगवन्ननुग्राह्यास्म वा यदि ॥३॥ अस्माकम
पि वाभीष्टं पूरय स्वसरोत्तमे ॥ कीर्तनीयं तु लोकेस्मिन्स्वरूपस्तव संद
र्शनेन हि ॥४॥ अहर्निशं तव ध्यानात्तथा स्याम परमां गतिं ॥ श्रीहं
स उ० ॥ करिष्ये हि प्रियं धीमत्साध्व्यो यूयं मम प्रियाः ॥५॥ अनुग्राह्या
मया नित्यं भक्तिग्राह्योस्मि सर्वशः ॥ ब्रह्मोवाच ॥ इत्युक्त्वा भगवान्शौ ॥७३॥
रिर्गोपीनां हितकाम्यया ॥६॥ सन्निधौ सरसस्तस्य शरीरमन्यच्चका
र ह ॥ तदगाधे स्वच्छजले नलिनीदलशोभिते ॥७॥ हंससारसयुग्मै

श्च चक्रवाकोपशोभिते ॥ कुमुदोत्पलकह्लारैः पद्मिनीखंडमंडिते ॥
८॥ सेविते द्विजमुख्यैश्च सिद्धविद्याधरैस्तथा ॥ सेवितं यदुनारीभिः
तथा यदुकुमारकैः ॥९॥ हर्षाद्गोपीजनं हंस उवाच वचनं तदा ॥ प
रस्परं गोपिकाः शुद्धं सरः सरस समीपतः ॥१०॥ स्वच्छामृतजलापूर्णंसि
क्तं नानायथा मनः ॥ कारणाद्भवतीनां च यस्मात्तन्निर्मितं सरः ॥११॥ भ
वतीनां तथा नाम्ना ख्यातमेतद्भविष्यति ॥ गोवाचा वाचकः शब्दो
भवतीनिर्मया सह ॥१२॥ गोपचारेति वै नाम ख्यातिं लोके गमि
ष्यति ॥ गोप्य ऊचुः ॥ अनुग्राह्याय दिव्यं अस्मत्तोप्यास्मतं सरः
॥१३॥ अन्यच्च किंचित्पि वाभीष्टं प्रार्थयामो वद स्वतत ॥ हंस उ० ॥ प्रा
र्थिता यदि भिः प्रोतं यद्वो मनसि वर्तते ॥१४॥ भवत्यास्समागता यूयं

नास्त्यदेयं ततो मया। गोप्यकुचुः। यदि तुष्टोसि भगवन् यदि देयो
वरो हि नः॥१५॥ तस्मात्त्वया सहास्माकं नरयानेन माधव। अत्रागत्य
न च स्येतु स्नातव्ये नियमेन हि॥१६॥ यत्र त्वं देवतास्तत्र यज्ञास्ती
र्थानि केशव। यत्र त्वं तत्र दानो निवृत्ता नि नियमस्तथा॥१७॥ ओंका
रश्च वषट्कारः स्वाहाकारः सुधा तथा। भुर्भुवः स्वर्महालोको जनः
सत्यं तपस्तथा॥१८॥ त्वन्मयं हि जगत्सर्वं सदेवासुरमानवं। तस्मा
त्तुमध्ये जगन्नाथ अत्र स्नाते जनार्दने। स्नानमात्रे त्रिभुवनं न वि
ष्यति न संशयः। त्रैलोक्यपावनी गंगा तव पादजलच्छिता। ल
क्ष्मीवक्षःस्थलस्था च मुखे देवी सरस्वती। सर्वभूतमयश्चात्र स्नात ॥७४॥
स्त्वं जगदीश्वरः॥१९॥ यदस्मिन्मनुष्याद्भिर्नाविना हि कलौ युगे। त

द्दस्व महाबाहो रूपो सत्याज्ञत्य ते॥२२॥ यात्रायामागतानां च यत्
फले तद्दस्व नः। श्रीभगवानुवाच। यत्फलं हि मनुष्याणां स्नातानां गो
पिकासरे॥२३॥ तत्शृणु ध्वमसौ हि ग्धसम्भ्रम पि गोपिकाः। सोप
स्करो सवत्सां च वस्त्रालंकारभूषणां॥२४॥ यद्यो क्रदहिणोपे
तां ब्राह्मणाय कुटुंबिने। सदाचारविशुद्धाय दरिद्रायोपकारिणे
॥२५॥ गोंदत्वा फलमाप्नोति स्नानमात्रेण तत्फलं। यावत्यदानि म
नुजः सप्तिनसहगच्छति॥२६॥ कुलानि दिवितावतिवसंति हरि
मंदिरे। सप्तिनसहगच्छेति गीतवादित्रनिःस्वनैः स्तुवंतो विविधैः
स्तोत्रैर्गोविंदं गोपिकासरे। नं मात्तुर्जगिरेते षोयात नाभवतेन्न
णो॥२७॥ सर्वान्कामानवाप्नोति वैष्णवं लोकमाप्नुयात्। अत्र

र्घं दत्वा विधानेन स्थाने कुर्याद्विचक्षणः ॥ २८ ॥ मंत्रेणानेन वै साध्व
श्रद्धया परया युतः । नमस्ते गोपरूपाय विश्वरूपे परमात्मने ॥ २९ ॥ जो
प्रचारे जगन्नाथ गृहाणार्घं नमोस्तु ते ॥ अर्घं दत्वा विधानेन स्वद
प त्तात्मस्यपाणिना ॥ ३० ॥ स्नायात् श्रद्धासमायुक्तः स्वर्पयेत्पितृ
देवताः । श्राद्धं कुर्यात्ततो भक्त्या एकचित्तः समाहितः ॥ ३१ ॥ यथोक्तां
दक्षिणां दद्यात् रजतं रुक्ममेव च । विशेषतः प्रदातव्यं तांबूलं कज्ज
लं तथा ॥ ३२ ॥ दुकूलानि च देयानि तथा कौसुंभकानि च । दंपत्यो
वासिसी चैव भूषणानि स्वशक्तितः ॥ ३३ ॥ गाश्च देया द्विजातिभ्यो
वृषभाश्च धुरंधराः । दीनांधकृपणानां च दानं देयं स्वशक्तितः ॥ ३४ ॥ ॥ ७५ ॥
एवं स्नात्वा नरः सम्यग्गुह्मां गतिमाप्नुयात् । प्रयाति परमां मुक्तिं पि

तरश्चैककोटिभिः ॥ ३५ ॥ लभंते पुत्रकामस्तु पुत्रान्निष्कामतोनुगान् ।
यं यं कामयते कामं स्वर्गमोक्षादिकं नरः ॥ ३६ ॥ तत्सर्वं समवाप्नो
ति यः स्नातो गोपिकासरे । यावद्धोका भविष्यंति तावस्यास्मृतिर्वै
सरः ॥ ३७ ॥ यावत्सरस्तावत्कीर्तिर्भवतीनां भविष्यति । यावत्कीर्तिर्मनु
ष्येषु तावत्स्वर्गं न संशयः ॥ ३८ ॥ विमुक्तपापाः सकला यास्यथः प
रमां गतिं । पुण्यं गोपीसरः इदं जलं स्नानं सिद्धं वरदं ॥ ३९ ॥ श्रवणाद्धं मया
गोप्यो न भक्तस्ते नियमेन हि । भवेत्यः पतिभावेन ब्रह्मभावेन वा पुनः ।
॥ ४० ॥ चिंतयेत्सः परं मां हि परां गतिमवाप्स्यथः ॥ प्रह्लाद उ ॥ अनुज्ञाता भ
गवता स्तत्र तां गोपकन्यकाः । नमस्कृत्य च गोविंदं ययुः सर्वा यथाग
तो । भगवानपि गोविंद उद्धवेन समन्वितः ॥ ४१ ॥ विसृज्य गोपिकास्सर्व

स्वधर्ममसंमुखं यये ॥ ४३ ॥ इति श्रीद्वारकामाहात्म्ये लक्ष्मणनयनं नाम ॥
॥ अथ ब्रह्मोवाच ॥ संत्यनेकानि तीर्थानि विख्यातान्यथ तानि च । प्राप्ते क
लियुगे घोरे तानि पुण्याब्धिसागरः ॥ १ ॥ उद्दिष्टानि तामया विप्राः कीर्त्यमाना
नि शृणवध्वं संक्षेपतो विचित्रवराण्यातेषां च याः कथाः ॥ २ ॥ संकल्प्य च
भुवोभारं साधून् संस्थाप्य सत्पथे । संगम्य सहलक्ष्मेन कार्येसमाधय
वात्मनः ॥ ३ ॥ वेधा चक्रे ततस्तीर्थं स्वनाम्ना कीर्तनं शुचिः । ब्रह्मकुंड
मिति ख्यातं सर्वपापप्रणाशनं ॥ ४ ॥ तत्तीरे स्थापयामास सहस्रं वि
रंचिश्च तं मत्वसुराणां दिक्पालं ब्रह्मलोकपितामहः ॥ ५ ॥ तेन संस्था ॥ ७६ ॥
पितो यस्मात् ब्रह्मस्थाने इति स्मृतः । ब्रह्मतीर्थे तु तं दृष्ट्वा चेद्दृवक्रे
ततः परे ॥ ६ ॥ तदा केचंद्रनाम्नावै सर्वपापप्रणाशने । तं दृष्ट्वा तेजसा

युक्तं संदृष्ट्वाः सुरसत्तमाः ॥ ७ ॥ ऊचुस्ते लोकसृष्टारं शृणुध्वं वचनं दितेः
योत्र स्नानं प्रकुरुते पितॄन् संतर्पयिष्यति ॥ ८ ॥ पूजयिष्यति देवेशं ब्र
ह्मस्थाने सुरर्षिभिः । सर्वपापविनिर्मुक्तो ब्रह्मलोकं स गच्छति ॥ ९ ॥
जीवते व्याधिनिर्मुक्तो धनधान्यसमन्वितः । सप्तम्यां माघमासस्य शु
क्लपक्षे द्विजर्षिभिः ॥ १० ॥ योत्र स्नानं प्रकुरुते मानवो भक्तिसंयुतः । ब्र
ह्मस्थाने तु देवेशं संस्थाप्य प्रविलप्य च । पूजयिष्यति वस्त्राद्यैः स्वश
क्त्यान्नपैर्णस्तथा । पुष्पधूपादिभिश्चैव नैवेद्यैन च मानवाः ॥ ११ ॥ सर्वा
न् कामानवाप्नोति ब्रह्मलोकं स गच्छति । सावित्रा च ततो दृष्ट्वा ब्रह्मण
स्थापितं पुरा ॥ १२ ॥ स्वेच्छाचारतनेदिव्यं स्वान्नन्तिसंनिवेशपरं नाम
चक्रे विधिस्तस्याः स्वयं देव्याः पितामहः ॥ १३ ॥ यः पश्यति स्वयं तत्र या

सकृत्से दृष्ट्वा जगत्पतिं। सर्वकामानवाप्नोति सुखी भवति सर्वदा॥१५॥
आयुरारोग्यमैश्वर्यं पुत्रं संतानमेव च। न दौर्भाग्यं भवेत्तेषां न दारि
द्र्यं न मूर्खता॥१६॥ न च व्याधिभयं तस्य यः पश्यति विधिं नरः। गत्वा सं
स्नापयेद्देवीं कुंकुमेन कुसुंभकैः॥१७॥ संपूज्य स्नापयेद्देवीं यात्रा च
सफला ततः। न वैधव्यं न दौर्भाग्यं न वैध्यान च मृत्युजा॥१८॥ विधि
दृष्टो मनुष्यैर्यैः कुले तस्मिन्न जायते। तस्मात्सर्वात्मना विप्रा विधिं
पश्येत्सुभावितः॥१९॥ परिच्छिन्नं भवेच्छेषं यात्रा च सफला भवेत्॥
प्रकृष्टं दृष्ट्वा ब्रह्मणा स्थापितं दृष्ट्वा ब्रह्मणा यत्नेन तथा॥२०॥ इंद्रस्व म॥११॥
र्के महाभागः स्थाने परमशोभने। स्थापयामास देवेशः लिंगं प्रति
मौजसं॥२१॥ तस्मिन्स्नात्वा च लभते यस्मादिंद्रपदं नरः। तस्मादिंद्र

पदं नाम सुप्रसिद्धं धरातले॥२२॥ इंद्रेण स्थापितं लिंगं यस्मात्प्रावन
यास द्विजा प्रसिद्धमिंद्रनाम्नो वै इंद्रेश्वरमिति श्रुतं॥२३॥ तस्य प्रसिद्धि
रतुला वद्धलिंगमिति द्विजाः। यस्य दर्शनमात्रेण मुच्यते सर्वपात
कैः॥२४॥ पितृणामक्षया तृप्तिर्जायते द्विजसत्तमाः। अष्टम्यां वा च
तुर्दश्यां स्नात्वा वा इंद्रपदे नरः॥२५॥ इंद्रेश्वरे वसेत्पूज्य याति मुक्तिपदे नरः
विशेषतस्तु संपूज्यो मकरस्थे दिवाकरे॥२६॥ उत्तरायणे च संक्राते
लिंगस्पर्शनकेन दि शिवरात्र्यां विशेषेण संपूज्य श्यामया सदा रा
त्रौ जागरणे स्थाप्य परमं लोकमाप्नुयात्। ब्रह्मतीर्थं तु तं दृष्ट्वा तत्पश्चा
त्सरस्तथा॥२८॥ दर्शयन्विष्णुना सार्द्धमेकरूपत्वमात्मनः। सर
श्वकारदेवेशो भगवान्पार्वतीपतिः॥२९॥ श्रुत्वा निसर्गेण जलेन—

ल्पिनीदलश्रेणिभितं उत्पलैः सर्वतः छिन्नं सरः सारसशोभितं ॥ ३०॥ त
दगाधजले दृष्ट्वा स्वयमेव पिनाकधृक् । सखुर्न विष्णुनासार्धं तत
स्तत्र वृषध्वजः ॥ ३१॥ ते देवास्तत्सरो दृष्ट्वा ब्रह्मविष्णुमुखाः सुराः । ऊ
चुः सर्वे सुसंहृष्टा वीक्षंतः पार्वतीपतिं ॥ ३२॥ यस्मात्त्वत्तमिदं विश्वा
दीश्वरेण महत्सरः । महादेवसरो नाम सुप्रसिद्धं भविष्यति ॥ ३३॥ ये
त्र स्नानं प्रकुर्वंते पितॄणां तर्पणं तथा । श्राद्धं पितॄणां भक्त्या च सग
च्छेद्योगिनां गतिं ॥ ३४॥ सुप्रसन्ना भविष्यंति सर्वे देवा न संशयः । द
र्शनात्पापनिर्मुक्तो महादेवस्य तस्य च ॥ ३५॥ महेशस्य च ते दृष्ट्वा ॥ ७८॥
सरस्तस्य सुशोभनं । चंडिका पार्वती तत्र स्नानं प्रतिमं तथा ॥ ३
६॥ गौरीसर इति ख्यातं सर्वपापप्रणाशनं । तत्र स्नात्वा नरो भक्त्या

न दुर्गतिमवाप्नुयात् ॥ ३७॥ न दौर्भाग्यं स्त्रिया याया स्नानाद्व्रज चैव कदाच
न । स्नात्वा वा गौरीसरसि पुण्ये सर्वान्कामानवाप्नुयात् ॥ ३८॥ वरुणश्च त
तो दृष्ट्वा पुण्याय तनान्बहूनुच्चकार स सरो दिव्यं विष्णुना भिपुर
स्कृतः ॥ ३९॥ नाम्ना वरुणपदं तत्तु पापक्षयकरं नृणां । विना तस्य हर्षि
मास्यायां संतर्प्य पितृदेवता ॥ ४०॥ श्राद्धं सम्यग्विधानेन पितॄणां श्र
द्धयान्वितः । उत्तमं लोकमाप्नोति यत्र गत्वा न शोचति ॥ ४१॥ प्रदद्यात्तु द
केनोश्वद्ध्योदनसमन्वितान् । गाश्च वासांसि रत्नानि विष्णुर्येंप्रीय
तामिति ॥ ४२॥ सरो दृष्ट्वा जलेशस्य सरश्चक्रे धनाधिपः । यक्षाधिपस
रो नाम सुप्रसिद्धं धरातले ॥ ४३॥ तथा तत्र नरो भक्त्या संतर्प्य पितृदे
वताः । सर्वकामानवाप्नोति दद्याद्वस्त्राणि ब्राह्मणे ॥ ४४॥ प्रह्लादं तु ॥

विष्णुं वरप्रदं दृष्ट्वा ब्राह्मणां ब्रह्मनंदनः ॥ मंदाकिनी वसिष्ठेन समानी
ता धरातले ॥४५॥ अथ मरीच्यादयः सर्वे आजग्मुः सुलपालिताः ॥
द्वारवत्यां ततो दृष्ट्वा गोमतीं सागरंगमां ॥४६॥ तीर्थानि देवतानां च पु
ण्यान्यायतनानि च ॥ तीर्थे पंचनदे चक्रुः प्रजानां पतयस्तदा ॥४७॥
पंचनद्यः समाहूतास्तत्राजग्मुस्त्वरान्विताः ॥ मारीच्यथ गोमती च
लक्ष्मणा यमुना तथा ॥४८॥ चंद्रभागा च तत्रैव एते पंचनदास्तथा ॥
तस्मात्पंचनदीतीर्थं सर्वपापप्रणाशनं ॥४९॥ स्नातव्यं तत्र मनु
जैस्तत्र मोक्षार्थिभिः सदा ॥ तत्र गत्वा तु नियतः गृहीत्वार्घं कलेन ॥७२॥
हि ॥ मंत्रेणानेन वै स्नायाद्दद्यादर्घं विधानतः ॥ ब्रह्मपुत्रैः समा
नीताः पंचैताः सरितां वराः ॥५०॥ उद्धृत्वार्घमिमं देवाः सर्वपापप्र

णाशनं ॥ स्नानं कृत्वा ततो देवान् पितृन्संतर्पयेन्नरः ॥५१॥ श्राद्धं कु
र्याद्विधानेन श्रद्धया परया युतः ॥ पंचरत्नं ततो देयं सप्तधान्यं द्वि
जातये ॥५२॥ दीनांधकृपणानां च दानं देयं स्वशक्तितः ॥ सर्वान्का
मानवाप्नोति विष्णुलोके स गच्छति ॥५४॥ पुत्रपौत्रसमायुक्तः परं
सुखमवाप्नुयात् ॥ प्रेतयोनिगता ये च ये च कीटत्वमागताः ॥५५॥
सर्वे ते मुक्तिमायांति पितरस्तत्कुलोद्भवाः ॥ इति श्रीप्रह्लादसंहिता
यां पंचनदीमाहात्म्यं ॥ ७ ॥ अथातमागतं देवब्राह्मणं पितरं स्वकं
सनकाद्या नमस्कृत्वा जग्मुः सर्वे पितामहं ॥१॥ ब्रह्मोवाच ॥ आराधि
तो यैर्भगवान् धन्या यूयं वयं तथा ॥ संसिद्धिपरमा याता भगवद्द
र्शनेन हि ॥२॥ न ज्ञातपुत्रकाः सम्यक् पुत्र ज्ञानाद्बाल्यबुद्धिभिः ॥ य

नार्चितोमहादेवस्तस्यतुष्यतिकेशवः॥३॥अनर्चितेनीलकंठे
पूजांनोगृह्णंतेदेवाः।तस्मात्सर्वप्रयत्नेनपूज्यतांनीललोहितः।
॥४॥येनसंस्थापितोयातिशजाविष्णुस्ततासदा।ततश्चोच्चावचेन
तस्यब्रह्मपुत्रायप्युस्तदा॥५॥देवगोष्ठंतुतेगत्वायोगसिद्धामह
र्षयः।लिंगसंस्थापयामासुः।शिवंत्रिपुरस्तुतं॥६॥तस्या
ग्रेशिवलिंगंचास्नानार्थंमुनिसत्तमाः।कूपंचक्रुस्ततःसर्वेऋष
यःशंसितव्रताः॥७॥दृष्ट्वातदमृतप्रख्यंजलंपूर्णंसुनिर्मलं।सहृ
ष्टाःऋषयःसर्वेसाधुसाध्वितिवाब्रुवन्।संस्थापितेशिवलिंगेतुदृ ॥८॥
ष्ट्वालोकपितामहः।उवाचवचनंब्रह्माप्रीतपुत्रादिपञ्जः॥९
नवद्विलोकसंसिद्धैयस्मात्संस्थापितःशिवः।तस्मात्सिद्धेश्वर

इतिनामचास्यभविष्यति॥१०॥समीपेस्थितिकंयस्यकूपोयं॰ऋ
षिभिःसतः।ऋषितीर्थमितिख्यातंतस्माल्लोकेभविष्यति॥११॥
विनाश्राद्धेनविप्रेंद्रदानेनपितृतर्पणा।नक्तितःस्नानमात्रेण
ब्रह्मलोकमवाप्यते॥१२॥असत्यवादिनोयेचपरनिंदापराय
णाः।स्नानमात्रेणशुध्यंतिऋषितीर्थेनसंशयः॥१३॥वाचिकीमा
नसंचैववकर्मणासमुपार्जितं।स्नातस्यऋषितीर्थेतुनश्यतत
नात्रसंशयः॥१४॥स्नानेप्रकाशंस्वंविमुच्यमन्वादिषुतथैवचात
त्रक्षपुगाद्यादिस्नातस्यद्विजसत्तमाः॥१५॥शिवरात्र्यांवसेद्यस्तु
लिंगेसिद्धेश्वरसंज्ञिके।स्नात्वातीर्थेऋषिस्तेविकतस्यान्येनवेदृ
जाः॥१६॥गत्वातत्रमहाभागागर्ह्यावाफलमुत्तमो।अर्घंदद्याद्विधा

नेनकृत्वाचकरयोः कुशान्॥१७॥ गंधदूर्वार्घमिदंविप्रायोगसिद्धामह
र्षयः॥ ऋषितीर्थेचपापघ्नेसिद्धेशस्यसमीपतः॥१८॥ दत्वार्घंमो
दमालुन्यस्तानेकुर्यात्पायोविधिः॥ सतर्पयेत्पितृन्देवान्मनु
ष्यांश्चयथाविधि॥१९॥ ततःश्राद्धंप्रकुर्वीतपितृणांश्रद्धयान्वितः॥ दद्या
च्चदक्षिणांतत्रवित्तशाठ्यविवर्जितः॥२०॥ सप्तधान्यप्रशालयश्च
पायसंगुडसंयुतं॥ गंधमाल्यानिवस्त्राणिसर्पिर्मधुस्तथापयः॥
२१॥ एवंकृत्वासमग्रंचतत्तत्फलंलभेन्नरः॥ पूजयित्वामहादेवं
सिद्धेश्वरमुमापतिं॥२२॥ सफलंजन्मतस्यस्याज्जीवितंचसुजी ॥७८॥
वितं॥ यःस्नात्वाऋषितीर्थेतुपश्येत्सिद्धेश्वरंशिवं॥२३॥ अपुत्रःपु
त्रिणःश्रेष्ठःपुत्रिणश्चापिपौत्रिणः॥ निर्धनाधनवंतश्चसिद्धेश्व

रमनानराः॥२४॥ दुःखंतेयातिविलयंसुखंतंचविवर्द्धते॥ मनोवांछ
नोरथावाप्तिःप्रणम्यसिद्धनायकं॥२५॥ पितरस्तस्यतृप्यंतितृ
प्यंतिचपितामहाः॥ ऋषितीर्थेनरःस्नात्वादृष्ट्वासिद्धेश्वरंप्रवकं॥
२६॥ त्रिवर्गाप्तौविनिर्दिष्टःप्रजनीयोमहात्मभिः॥ यंयंकामयते
कामंतंददातिनसंशयः॥२७॥ चिंतामणिममस्वामीअथवावा
द्वयोनिधिः॥ ऋषितीर्थेनरैर्वैस्तुदृष्टःसिद्धेश्वरःप्रभुः॥२८॥ इति
श्रीद्वारकामाहात्म्येऋषितीर्थमाहात्म्यं॥ ७॥ प्रह्लाद उ॥ ततोगच्छे
तविप्रेन्द्रागत्वातीर्थमनुत्तमं॥ यत्रस्नात्वानरःसम्यक्सर्वती
र्थफलंलभेन्नरः॥१॥ नमस्कुर्याच्चदेवेशंविष्णुंवाराहरूपिणं॥ त
रक्षपरयाभक्त्याविष्णुलोकेमहीयते॥२॥ नागतीर्थंततोगच्छे

सरः परमशोभनं ॥ यत्र स्नात्वा नरः सम्यक् नागलोकमवाप्नु
यात् ॥ ३ ॥ विश्रामसरः ततो गच्छेत् तीर्थं त्रिभुवनोर्जितं ॥ स्नानमात्रे
ण लभन्ते तिलधेनुफलं नरः ॥ ४ ॥ यदा द्वारवती विप्रा ह्याविता
सागरेण हि ॥ पुण्यानि बहुतीर्थानि छन्नानि जलसंभुतेः ॥ ५ ॥
दृश्यानि कतिचित्संति अदृश्यानि पराणि च ॥ तानि सर्वाणि विप्रें
द्राः कथयामि समासतः ॥ ६ ॥ चंद्रभागे ततो गच्छेत् सर्वपापप्रणा
शनं ॥ तत्र स्नात्वा नरो नित्यं वाजपेयफलं लभेत् ॥ ७ ॥ देवी चंद्रा
र्चिता यत्र शोभना नंदनंदिनी ॥ कुमारिकां त्रिहस्तां खड्गखेटक ॥८२॥
धारिणीं ॥ ८ ॥ कंसादिदैत्यदलनीं स्वसारं रामकृष्णयोः ॥ यस्या द
र्शनमात्रेण सर्वकामानवाप्नुयात् ॥ ९ ॥ ततो गच्छेत विप्रेंद्राः स्त्री

र्यंमदिवसन्निकं ॥ यस्या दर्शनमात्रेण वाजपेयफलं लभेत् ॥
१० ॥ वज्रतीर्थे ततो गच्छेत् श्रद्धया परया पुनः ॥ स्नात्वा श्राद्धं पितॄणां दि
व्यं लोकमाप्नुयात् ॥ ११ ॥ प्रद्युम्नतीर्थे तत्रैव सर्वपापप्रणाशने ॥
स्नात्वा श्राद्धं च तत्रैव मुच्यते सर्वपातकैः ॥ १२ ॥ दुर्वाससा यत्र शप्ता
कोपाद्यदुकुमारकाः ॥ तत्र जालेश्वरो देवः संबभूव उमापतिः ॥
१३ ॥ जालेश्वरे ततो दृष्ट्वा सद्यः पापात्प्रमुच्यते ॥ संपूज्य विधान
तः पार्वतीं शिवलोकमवाप्नुयात् ॥ १४ ॥ चक्रस्वामिनतीर्थं तु ततो गच्छे
त् मानवः ॥ स्नात्वा स्नाने पितॄन् तर्पेत् विष्णुलोकमवाप्नुयात् ॥ १५ ॥
जरत्कारुस्ततः तत्र तीर्थे त्रैलोक्यविश्रुते ॥ स्नात्वा तत्र द्विजश्रेष्ठा न
दुर्गतिमवाप्नुयात् ॥ १६ ॥ आसीच्च वज्रनको नाम दैत्यः ख्यातिबला

न्वितः ततः खंजनकं तीर्थं तत्र नाम्ना सुविश्रुतं ॥ ७ ॥ तत्र स्नात्वा
नरो याति सोमलोके न संशयः ॥ मुक्तितीर्थं ततो गच्छेत्तीर्थं पापप्र
णाशनं ॥ ८ ॥ वसिष्ठेन समानीता मुनिना यत्र गोमती ॥ स्नातो
भवति गंगायां यत्र स्नात्वा कलौ युगे ॥ ९ ॥ गोमती निस्सृता य
स्मात् विप्रा वरुणालयं ॥ तत्र स्नात्वा नरो भक्त्या अश्वमेधफलं
लभेत् ॥ १० ॥ भृगुणा हि तपस्तप्तं संस्था पिता यत्र चांबिका ॥ भृ
गुचिंता ततो देवी प्रसिद्धा श्रूयते हि तौ ॥ ११ ॥ स सिद्धिं परमां याति
यस्याः संस्मरणान्नरः ॥ शिवलिंगान्यनेकानि यत्र संति महीतले ॥ ८३ ॥
स्नातगच्छेत विशेषतः ॥ कालिंदीसर उत्तमं ॥ कालिंदी सूर्यतन
या चक्रे सरश्चनुत्तमं ॥ १२ ॥ तत्र स्नात्वा नरो भक्त्या न दुर्गतिमवा

प्नुयात् ॥ सांबतीर्थं ततो गच्छेत्सर्वपापप्रणाशनं ॥ १४ ॥ स्नात्वा श्रा
द्धं च विधिवत् लभेत्क्रतुदानजं फलं ॥ ओंकारं च ततो गच्छेत्तीर्थं त्रै
लोक्यविश्रुतं ॥ १५ ॥ तत्र स्नात्वा नरो भक्त्या लभेद्बहुसुवर्णकं ॥
ततो नागसरो गच्छेत्तीर्थं पापप्रणाशनं ॥ १६ ॥ पितॄन् संतर्प्य वि
धिवत् नागलोकमवाप्नुयात् ॥ लक्ष्मीनदी ततो गच्छेत् कुच्छतीसा
गरप्रति ॥ १७ ॥ यस्याः स्पर्शनमात्रेण मुच्यते सर्वपातकैः ॥ श्राद्ध
कृते तु विशेषतः पितॄणां मुक्तिमावदेत् ॥ १८ ॥ दानि मनोरथावाप्ति
सवते नात्र संशयः ॥ कंबुसरस्ततो गच्छेत्तीर्थं पापप्रणाशनं ॥ १९ ॥ तर्प
णं च सते श्राद्धे च अग्निष्टोमफलं लभेत् ॥ कुशातीर्थं ततो गच्छेत्स्नात्वा सं
तर्पयेत्पितॄन् ॥ २० ॥ दानेद्वाय प्राशस्या निर्मलं लोकमाप्नुयात् ॥

संतितीर्थान्यनेकानिसुगुप्तानिकलौयुगे॥३१॥नानिगछंतुविशेषेण
तीर्थमानकदुंदुभेः॥सूरतीर्थंपरमकंगदातीर्थमतःपरं॥३२॥गाव
लाणस्यतीर्थंचवक्रूरस्यमहात्मनः॥बलदेवस्यतीर्थंतुउग्रसेन
स्यचापरं॥३३॥अर्जुनस्यतुतीर्थंचसुभद्रातीर्थमेवच॥देवकीती
र्थमाद्यंतुरोहिणीतीर्थमुत्तमं॥३४॥उद्धवस्यचतीर्थंतुसारंगारव्यंतथै
वच॥सत्यभामासतेतीर्थंभद्रातीर्थमतःपरं॥३५॥जमदग्न्यस्यती
र्थंतुरामस्यचमहात्मनः॥व्यासतीर्थंचतत्रैववसुकतीर्थमतःपरं॥३६
कर्दमस्यचतीर्थंतुकपिलस्यमहात्मनः॥सोमतीर्थंतुतत्रैवरोहिणी
तीर्थमेवच॥३७॥एतान्यन्यानिसंक्षेपात्मयाचकथितानिच॥सर्व ॥८६॥
पापहराणीहमोक्षदानिनसंशयः॥३८॥प्रधानानिद्विजश्रेष्ठातीर्था

निकलिसंक्रमे॥श्रावितानिसुदुर्लभापांसुनाउदकेनच॥३९॥एतन्म
यावःकथितंसंक्षेपात्तीर्थविस्तरं॥आत्मप्रज्ञानुमानेनकिमन्यछ्रो
तुमिछथ॥४०॥एवंतिपरयाभक्तयातीर्थयात्रामिमांद्विजाः॥सर्व
पापविनिर्मुक्ताविष्णुलोकंव्रजंतिते॥४१॥इतिश्रीद्वारकामाहात्म्ये
प्रह्लादप्रोक्तसंहितायांतीर्थमाहात्म्यं॥ ॥७॥ ॥ऋषिरुवाच॥सता
न्निषिकतीर्थेषुयथावद्दूत्तदक्षिणा॥इज्यतेचततोदेवेंद्रस्यसर्वपुरु
षपरं॥१॥ऋषयऊवाच॥इज्याविधिंचसंक्षेपस्ययथावेदोत्यसत्तम॥
कथयस्वमहाभागआनुपूर्व्यासमासतः॥२॥द्वारपालश्चकस्त
त्रकःपूर्वंपूजितश्चकः॥पुरीयेसर्वतोदेत्यतिष्टंतेकेनपालिता॥आ
नुपूर्व्यासमासेनपूजनीयायथाविधिः॥कथयस्वविधिज्ञोसित्वं

ष्टै कचरण प्रिय ॥ ४॥ ब्रह्मा दउ ॥ श्रूयतां सृजने विप्रा श्चानुपूर्व्या विधम
न तः ॥ कल्लौ सहस्रस्य विपेन्द्र यथावदनुपूर्वशः ॥ ५॥ पूर्वद्वारस्थितं
देवं शृणुध्वं सुसमाहिताः ॥ जयंतः प्रथमं प्रोक्तो पुलोमस्य सुतासु
तः ॥ ६॥ स्थापितो देवराजेन स वार्य केशवस्य च ॥ संवर्त्तो रूषिभि
र्येस्तु तान्निबोधत सत्तमाः ॥ ७॥ वज्रबाहुः सुनामश्च वज्रबाहुर्महाद
नुः ॥ वज्रदंष्ट्रो वज्रधारी वज्रहा वज्रलोचनः ॥ ८॥ श्वेतमूर्द्धो श्वेतमा
ली जीमूतानुचरश्च ते ॥ एते रुद्रा घातकरा रक्षंतेतमहर्निशं ॥ ९॥ पू
र्वद्वारे सुसन्नद्धा जयंतो देशकारिणः ॥ पूर्वद्वारे चरस्त्र्यैनरनाथो ॥८५॥
विनायकः ॥ १०॥ तरुणादित्यवेस्र्यैदिव्यावैसप्तमातरः ॥ ईश्वरश्च
पिदिग्वासा नागराजश्च तक्षकः ॥ ११॥ सेनानी कार्त्तिकेयश्च रासस

श्च महासुरवः ॥ तत्र दीर्घनखो नाम हाम वः सुप्रतिष्ठितः ॥ १२॥ विश्वा
वसुश्च गंधर्व मेनका चवराप्सरा ॥ सनत्कुमार सहितो वसिष्ठो भग
वान् रूषिः ॥ १३॥ एते हि पूर्वतस्तुन्य ग्रोधश्च महाद्रुमः ॥ पूर्वद्वार
स्थितान्येवानाग्नेयान्यपि मे शृणु ॥ १४॥ ज्वालामुखोप्य रक्ताक्षः स्मर ग
न निलप्रलशः ॥ मांसादो रुधिराहार शंख शंखजटाधरः ॥ १५॥ त्राय
तोनुजतश्चैव नागश्वाश्वतरस्तथा ॥ विश्वांगदश्च गंधर्वउर्वशी च वा
रा सरा ॥ आग्नेय्यां दिशि संस्थिताः ॥ दिशं रक्षंति सन्नद्धा दक्षिणा मय
मे शृणु ॥ १६॥ हेउपाणि महानादो याशहस्तोग्रलोचनः ॥ श्ववर्त्त को
मारश्चतथाद्रुदुन्तिनिःस्वनः ॥ १७॥ खरस्वनो घर्घरश्च तथा मो
नप्रियस्तथा ॥ मक्षिकासश्च एते षोडशताद्वारपालकः ॥ १८॥ म

दिषार्कश्चैवसूर्योन्नूषणाश्चस्त्रथैवच ॥ पिंडिचतथादेवीउर्द्धबाहु
श्वराक्षसः ॥१९॥ पद्मासक्षेत्रपालश्चनागश्चाश्वतरस्तथा ॥ चित्रो
गादश्चगोधमर्वडुर्वंशीचवरासरा ॥२०॥ गोरजोदानवश्चैवश्मालस्या
पिमहद्रुमः ॥ सनातनऋषिश्रेष्ठअगस्त्यश्चमहातपाः ॥२१॥ एत
याम्पदिक्षुगद्धारंरक्षंतिससमादिताः ॥ गीतसन्नर्तकोनग्नोकबली
रुदनाप्रियः ॥२२॥ हसनोनेत्रभंगश्चचूर्विकारोविजृंभकः ॥
मुखालीस्तर्पकस्तेषांनेतादेवातथाप्रभुः ॥२३॥ रक्षंतिनैऋतामाशं
पश्चिमांशृणुतापरं ॥ स्वस्तिकःशंसमूर्द्धचनीलवासाःशुनाननः ॥
२४॥ पाशहस्तःशूलहस्तोएकपादेकलोचनः ॥ स्थूलजंघस्थूलशि ॥८६॥
राःसुमुखस्मवशेस्थिता ॥२५॥ एतेशास्त्रीघातकरावारुणीपालयं

तिदि ॥ पश्चिमादिशिमास्यायपुष्पदंतोविनायकः ॥२६॥ उर्द्धवार्क
श्चैवडूर्यःप्रिवःसत्राजितेश्वरः ॥ तुंबरुर्नमिगंधर्वोघृताचीचवरा
सराः ॥२७॥ महोदरश्चनागेंद्रोराक्षसश्चगदाकवः ॥ दैत्यपंचजनो
नामऋषिःकश्यपएवच ॥२८॥ देवीकापालिनीनामक्षत्रश्वृष्ठश्च
महाद्रुमः ॥ कपिलक्षेत्रपालश्चप्रतीचींपालयन्दिशं ॥२९॥ नम
स्कायोस्तथारुच्यावायव्यांशृणुतानघाः ॥ तेजानाभैरवश्चैवका
लिकोश्वघटोदरः ॥३०॥ उर्द्धकोमर्दनःपिंगोरुरुःसर्वस्तुजोघणी
रूपश्चप्रभुरेतेवासेनदृपालयन्तुदिशं ॥३१॥ उदीच्यादिशिविघ्न
दृःशामलश्चगणाधिपः ॥ मत्तश्चकोविरूपश्चगलकोभैरवस्मृत ॥
३२॥ मुकुलकछोवेसुकश्चजंबुकोप्यपराजितः ॥ उन्मत्तप्रभुरेत

उदीचीं पालयन् दिशं ॥३३॥
षां सन्नद्धः पालयन् दिशं ॥ मूलस्थानश्च वै सूर्यः संप्रवासो महेश्व
रः ॥ देवी चंडेश्वरी नाम क्षेत्रपालश्च खेडनः ॥३४॥ वासुकिर्नागराज
श्च कूर्मपृष्ठश्च दानवः ॥ सनकश्च ऋषिश्रेष्ठो गोलको राक्षसस्तथा ॥
३५॥ नारदो नाम गंधर्वो रंभा चैव वराप्सराः ॥ एते पूज्याः प्रयत्नेन ब्रह्मो
नाम महाद्रुमः ॥३६॥ यद्देवा सेविता मातॄणां एते पूज्याः प्रयत्नतः ॥ इ
शान्यां दिशि विघ्नेशः किंकिणीको महाबलः ॥३७॥ उद्दंडो भैरवश्चै
वः दुर्मुखो मेघनिस्वनः ॥ करालो विकलो मूको बलिश्च कुचब
लिप्रियः ॥३८॥ मांसप्रियः सुखाश्चैव ऐशान्यां गोपयंति दिशं ॥ एते ॥८७॥
षां क्षेत्रपालानां सेश्वराणां द्विजोत्तमाः ॥३९॥ नेता प्रभुश्च स्वामी च
जयंतः पालकस्तथा ॥ निग्रहानुग्रहौ तिरस्कृताः पुरवासिनां ॥
॥४०॥

जयंतो देशमादाय विघ्नं संघातयेत्तिदि ॥ नागकुलस्थितः स्वामी ज
यंतः पालकस्तथा ॥४१॥ नागराजैः परिवृतः पूजनीयः प्रयत्नतः ॥
सहस्रशिरसं तत्र शेषं नागस्थलस्थितं ॥४२॥ अनंतो वासुकि
श्चैव तक्षकः पद्म एव च ॥ शंखः कंबलकश्चैव नागश्चाश्वतरस्त
था ॥४३॥ कर्कोटकमुखा नागास्तत्र वसंति सहस्रशः ॥ ते पूज्या ग
धपुष्पैश्च बलिभिः पुष्पसंचयैः ॥४४॥ पायसेन च मांसेन तत्र नाग्यैः
सुरयालयाः ॥ ततः संप्राप्य देवेशो जयंतेरक्षिणां वरं ॥४५॥ गंधधूपो
पहारैश्च पुष्पवस्त्रादिभूषणैः ॥ ततो गत्वा द्विजश्रेष्ठाः सहस्रं देवे
किनंदन ॥४६॥ सहस्रपूज्य प्रथमं तत्र गणेशो रुक्मिसंज्ञिकाः ऋषय
ऊचुः ॥ क एष रुक्मिदैत्यो द्वयोर्दुष्टो गणतां गतः ॥४७॥ साक्षाद्गव

तोद्वारिप्रत्यूहः पूज्यते नरैः ॥ प्रह्लाद उ० ॥ सस्मयं रुक्मिणीं दृष्ट्वा यदारा
रामकृष्णौ तदा भाषां क्रोधसंयुक्तो रुक्मी चैवममन्यत ॥४८॥ पदाजहा
र भगवान् रुक्मिणीं मे विकालयात् ॥४९॥ नादत्त्वा विनिवर्त्तिष्ये
तमहं यादवाधमं ॥ एवमुक्त्वा तु सैन्येन युद्धाय परिधावितः ॥५०॥
स युध्यमानः कृष्णेन भग्नमानो हतोद्यमः । रामेण बंधनान्मुक्तो
मरणाय मतिं दधे ॥५१॥ रुक्मिणी भ्रातरं दृष्ट्वा मरणे कृतनिश्चयं ।
उवाच कृष्णं वैदर्भी भ्रातरं मानयस्व मे ॥५२॥ ततस्तत्प्रियकामार्थं
मनुमान्य जनार्दनः । चकार पार्षदं वाक्यप्रवरं विघ्ननाशनं ॥५३॥
एतस्मात्कारणाद्विप्राः प्रथमं पूज्यते सदा । गंधधूपादिभिर्दिव्यैर्नैवे ॥५८॥
मोदकैः परितर्पयेत् ॥५४॥ इति श्रीद्वारकामाहात्म्ये देवयात्रायां प

रिवारकथनं नाम ॥ ७ ॥ प्रह्लाद उ० ॥ संपूज्य गणनाथं तं रुक्मि
णीं रुक्मभूषितां । दुर्वाससं च कृष्णं च बलदेवं च भक्तितः ॥१॥ ज
यत्येको महायज्ञैः सहस्रैर्वरदक्षिणैः । एकः पश्यति देवेशं कृष्णं तुल्यफ
लौ हि तौ ॥२॥ जोभूहिरण्यपद्मानां निर्दहात्येको दिने दिने । एकः पश्यति
देवेशं कृष्णं तुल्यफलौ हि तौ ॥३॥ प्राणायामादिसंयुक्तो ध्यानज्ञानपरा
यणः । एकः पश्यति देवेशं कृष्णं तुल्यफलौ हि तौ ॥४॥ त्रिभिस्त्रिविक्रमै
र्येन विक्रांतं भुवनत्रयं । त्रिविक्रमं च तं दृष्ट्वा मुच्यते पातकत्रयात् ॥
५॥ ऋषय ऊचुः ॥ कथं त्रैविक्रमी मूर्त्तिरागता येन धरातलात् । काला
न्यासा च कृष्णस्य चैव कदंयं च गतागतो ॥६॥ दैत्ये च संज्ञा यो साकं केन तु
मर्दस्य शेषतः । दुर्वाससस्य कृष्णस्य संभवः कथ्यतामिति ॥७॥ प्रह्ला

द उ॥ ततश्श्रूयतां द्विजश्रेष्ठा यथा मूर्तित्रिविक्रमे दुर्वाससे समायुक्तो
संभूता धरणीतलात्॥८॥ पूर्वं हि सत्ययुगे तेवे बलिना च पुरंदरः॥
निर्जित्य याचितः स्थानात्पातालेतलवासिन॥९॥ भक्त्या चानन्यया
लक्ष्मः इज्यया परितोषितः स्वयं चैवावसत्तत्र भक्त्या क्रीतोपसेव
कः॥१०॥ अनुग्रहाय भगवान् द्वारपालो बभूव ह॥ दुर्वासा चापि
भगवानात्रेयो मुनिसत्तम॥११॥ अटन् तीर्थानि मोक्षार्थी मु
क्तिक्षेत्रमचिंतयन्॥ एवं चिंतयतस्तस्य ज्ञानदृष्ट्या महामुनिः॥१२
गोमत्याः संगमो विप्रा चक्रतीर्थं तु मुक्तिदः॥ एवं स निश्चयं सद्यागम ॥८९॥
नाय मतिं दधे॥१३॥ सोतीत्य नगरग्राममुद्यानानि वनानि च॥ अनंत
विषयप्राप्तो दैत्यभूमिं विवेश ह॥१४॥ निस्वाध्याय वषट्कारं वेदध्व

निविवर्जितं कुशैर्दैत्यराजेन सेवितां पालितां तथा॥१५॥ बहुम्लेछसमा
कीर्णां च धर्मपापार्जितैर्धनैः॥ प्रत्यासन्नमिति ज्ञात्वा चक्रतीर्थं तदा द्वि
जः॥१६॥ स्नात्वा च संगमे पुण्ये नो स्पृहं च सतां द्विकः॥ इति सत्वासनि
यमं ययौ शीघ्रगतिर्द्विजः॥१७॥ स्नात्वा शीघ्रं यास्यामि दैत्यभूमिं वि
हाय च॥ इत्येवं चिंतयन्मार्गे शीघ्रमेव जगाम सः॥१८॥ गत्वा तु संग
मं पुण्यं गोमत्याः सागरस्य च॥ निधाय वाससी तत्र मृदुमाहृत्य गोम
ये॥१९॥ शिखां बद्ध्वा ततो मूर्ध्नि सत्वाच करयोः कृत्वा न॥ यदा स्नातुस्यति
विप्रोसौ दृष्टो दैत्यै दुरात्मभिः॥२०॥ कुर्वंतः कोयमित्येवं हन्यतां हन्य
तामिति॥ इति ब्रुवंतो हन्तुसो जानुनिर्दृष्टिभिस्तया॥२१॥ चित्रांग
दश्च गंधर्व उर्वशी च वराप्सरा॥ गोरजो दैवैश्च वरास्तस्यापि मा द्रुम॥
॥२२॥

सनातनऋषिश्रेष्ठो ऽगस्त्यश्च महातपाः॥ एते याम्यदिशो द्वारं रक्षंति सु
समाहिताः॥२३॥ गीतसन्नर्दको नैर्ऋतो बली रुद्रनाप्रियः रक्षंति नैर्ऋ
तामाशांपश्चिमांश्रृणु तापरां॥२४॥ स्वस्तिकः शंकुकर्णश्च नीलवासाः
शुभाननः पाशहस्तः शूलहस्त एकपादैकलोचनः॥२५॥ स्थूलजंघः
स्थूलशिराः सुमुखस्य वशे स्थिताः॥ एते शास्त्रोद्यतकरा वारुणीं पाल
यंति दिक्॥२६॥ पश्चिमां दिशमास्थाय पुष्पदंतो विनायकः उर्द्ध्वा वा
थ्यैवसूर्यः शिवः सत्राजितेश्वरः॥२७॥ आत्रेयः शरणं विष्णुं जगाम ध
रणीतले उपवासः सशोकदीनो भूतले प्रविवेशह॥२८॥ सादित्यराजश्च
वने गंधर्वासरःशोभिते शोभितं सुरमुख्येन विष्णुना प्रत्नविष्णुना॥ ॥२९॥
२९॥ दुर्वासस समयायां तं दृष्ट्वा दैत्यपतिस्तथा प्रत्युत्थाय ईर्ष्यया च कि

आसने संन्यवेशायत॥३०॥ मधुपर्कं च गां चैव दत्वार्घ्यं पार्श्वतः स्थितः॥
प्रोवाच प्रणतः प्रह्वः तत्रागमनकारणं॥३१॥ सुखोपविष्टः स ऋषि
स्तत्रापश्यत्त्रिविक्रमं दैत्यद्वारदेशोतु तिष्ठंतमकुतोभयं॥३२॥
तं दृष्ट्वा देवदेवेशं वासांके चतुर्भुजं रुदन्नृषिवरः सोऽपत्रादि
त्रादित्यभाषत॥३३॥ संसारभयभीतानां दुःखितानां जनार्द्दनाश
त्रुभिः परिभूतानां शरणं शरणार्थिनां॥३४॥ मम दुःखान्वितस्य
शत्रुभिः कर्षितस्य च पराभूतस्य दीनस्य कशायापीडितस्य च॥३५॥
अहर्निशमस्याप्यकेशितस्य च दानवैः भूत्वा एव देव विप्रस्य श
रणं भव केशव॥३६॥ इत्युक्त्वा दर्शयामास शरीरं दैत्यताडितं तद्ब्रा
ह्मणापमानेन दृष्ट्वा चुक्रोध माधवः॥३७॥ केनावमानितो ब्रह्मन्

नियमःकेनखंडितः।कथ्ययस्वमहाभागधर्मगोप्ताभविष्यति॥३८॥
दुर्वासाउ॥मुक्तितीर्थमहंज्ञात्वाज्ञानिनमधुसूदनाच्चक्रतीर्थंगतः
स्नातुंयात्रायांहर्षसंयुतः॥३९॥अहंतत्स्नानएवादंदृष्टोदैत्येनदुरा
त्मना।गलेगृहीत्वातस्मान्मुष्टिभिस्ताडितस्तथा॥४०॥बलात्गृ
हीत्वावासांसिकुशांश्चैवाहृतैःसह।हनिष्यामोयदिपुनरागंतासि
नसंशयः॥४१॥स्नातोहंचक्रतीर्थेतुकरिष्येभोजनंविभो।तस्मा
त्स्नापयगोविंदनियमंसफलंकुरु॥४२॥तवप्रसादात्स्नात्वाचानुत्सुकाव
प्रीतमानसः।प्रतिज्ञासफलोभूत्वाविचरिष्येमहीमिमां॥४३॥७॥ ॥९१॥
इतिश्रीद्वारकामाहात्म्ये॥७॥प्रह्लादउ॥ततश्चोदेवदेवेशश्चिंत
यित्वापुनःपुनः।उवाचवचनंतत्रदुर्वाससमकल्मषं॥ ॥विष्णुरु॥

पराधीनोस्मिविप्रेंद्रनतैःक्रीतोस्मिनान्यथा।बलेरादेशकारीचदैत्ये
न्द्रवचसागोप्यहं॥२॥तस्मात्प्रार्थयविप्रेंद्रदैत्यंवैरोचनंबलिं।अस्या
देशंकरिष्यामियद्यदीप्सितवाधुना॥३॥ततश्चवचनंविप्रोबलि
प्रोवाचसत्वरः।यद्विनोवेवरिष्यद्रक्षणोत्वमतोधिकः॥४॥त्रयाप
रश्चतपणादयोकुरुममोपरि।प्रेषयस्वमहाभागदेवदैत्यविनि
श्रेदा॥५॥संग्रहीनियमःस्नात्वाभोजनंकर्तुमुत्सहे।ततश्चवाचवचनं
दैत्योनातिरुष्टमनाइव॥६॥दुर्वाससमुवाचेदंनैतदेवंभविष्यति।
अन्यत्प्रार्थयविप्रेंद्रयत्तेमनसिवर्तते॥७॥करिष्यामिनसंदेहोय
द्यपिस्यात्सुदुर्लभं॥दुर्वासाउ॥नातिलुब्धंदिमोविद्धिकिमन्यत्प्रार्थ
यामितेरक्षामजीवितेदैत्यप्रेषयस्वजनार्दनं॥बलिउ॥जानासिद्धं

यथा विप्र हिरण्याक्षो निपातितो ॥९॥ तथा यज्ञवराहस्तु जहारोर्वीं ब
लादिव तथा च दैत्यप्रवरमवध्यं देवमानुषैः ॥१०॥ हतवान्नृहिरण्य
कशिपुं नरसिंहः सर्वगः प्रभुः ॥ तथाप्यवत्सनमुविंदकलैकेश्रीसं
क्षितं ॥११॥ यथानमायया विष्णुः सुरार्थे सुरसत्तमः ॥ प्रथमं वामनो
भूत्वा याच्ञया च तपदत्रयं ॥१२॥ पुनस्त्रिविक्रमो भूत्वा भुवनानि ज
हार ह ॥१३॥ मया पुण्यकृता ह्विष्णुर्यदि प्राप्तः कथंचन ॥ नाहं मोक्ष्ये
जगन्नाथं मायावामनकं प्रभुं ॥१४॥ दुर्वासा उ० ॥ नाहं मोक्ष्ये विनास्ना
त्वा गोमत्युदधिसंगमे ॥ यदि न प्रस्यसि द्रष्टुं ततस्ते हे कलेवरं ॥१५॥ ॥५२॥
बलिरु० ॥ यद्यप्येतद्भवत्तु ते यज्ञो नासि यथा कुरु ब्राह्मणेन्द्र न मि
नानाहं त्यक्ष्ये पदद्वंद्वं ॥१६॥ तथा विवदमानौ तु दृष्ट्वा तु जगदीश्वरः

ब्राह्मणे देवः स्वपया ब्राह्मणं तमुवाच ह ॥१७॥ स्वस्थो भव द्विजश्रेष्ठ
स्नायमिष्ये न संशयः ॥ हत्वा दैत्यगणान्सर्वान् गोमत्युदधिसंगमे
॥१८॥ प्रद्युम्न उ० ॥ श्रुत्वा भगवतो वाक्यं ब्राह्मणस्य च दैत्यराट् ॥ द्विजं
ग्राहेश्वरोपतितश्चा पादयोस्तदा ॥१९॥ ततः सर्वे हि ममगमत्या दैद
त्वा बलेः प्रभुः ॥ शंखचक्रगदापाणिर्दुर्वाससा समन्वितः ॥२०॥ सुरा
ली च यतस्तस्य ते विष्णुस्त्रिविक्रमः ॥ ततो नु गमने विप्रो दुर्वासा
भूत्वा ह्वदि ॥२१॥ नियारसातलं सर्वे समुत्तस्थुस्त्वन्विताः ॥ आविर्
भूवुस्ततस्तत्र गोमत्युदधिसंगमे ॥२२॥ सन्तुष्टो हृष्टधन्वानौ सकर्ष
ण जनार्दनौ ॥ ऊचतुस्तौ तदा विप्रं कुरु स्नानं यथेच्छया ॥२३॥ तयोस्तु व
चने श्रुत्वा स्नानं चक्रे द्विजवरान्वितः ॥ स्नात्वा चावरपकं कर्म कर्तुमारभत

द्विजाः॥३॥ इति श्रीतारकामहात्म्ये एकोनविंशोऽध्यायः॥१९॥ ब्रह्मोदउ॥
ब्रह्मघोषध्वनिं श्रुत्वा दानवो दुर्मुखस्तदा॥ क्रोधसंरक्तनयनो दुर्वा
ससमथाब्रवीत्॥१॥ हन्यमानस्त्वमस्माभिर्यदि मुक्तोऽसि वै द्विजः॥
कस्मात्पुनरिहायातो मरणाय सुमंदधीः॥२॥ इत्युक्त्वा मुष्टिना हन्तुम
भवद्दुष्टदानवः॥ तं दृष्ट्वा दानवं विष्णुर्ब्राह्मणं हंतुमुद्यतं॥३॥ चक्रे
ण सुरश्रेष्ठ शिरश्चिच्छेद लीलया॥ ब्रह्मोदउ॥ दुर्मुखं निहतं दृष्ट्वा
दानवो दुःसहस्तदा॥४॥ प्राक्रोशद्दुष्टैर्दितिजान्शीघ्रमागम्य तामि
ति श्रुत्वा दैत्यगणाः सर्वे दुर्मुखं विनिपातितं॥५॥ दुर्वाससं पुन
स्तत्र परिस्त्रातं च विष्णुना॥ कूर्मपृष्ठो गोलकश्च क्रोधनो वेददूषकः ॥९३॥
॥६॥ यज्ञघ्नो यज्ञहंता च धर्मांतकस्तपस्विहा॥ एते चान्ये च बहवो॥

विविधायुधपाणयः॥७॥ क्रोधसंरक्तनयनाः पश्यंतो ब्राह्मणं तदा॥
परिक्षिप्य तदात्रेयं विष्णुं संकर्षणं तथा॥८॥ तोमरैः पट्टिशैर्मालैश्च
मुशलैश्च भुशुंडिभिः॥ शस्त्रैर्नानाविधैश्चापि युयुधुः क्रोधमूर्छि
ताः॥९॥ दानवैः संवृतो विष्णुः समंताद्घोरदर्शनैः॥ संकर्षणश्च शुशु
भे चंद्रादित्यौ घनैरिव॥१०॥ उद्दीच्य धनुषी दिव्ये ववर्षुः शरवृष्टि
भिः॥ तेन मार्गेण यो दैत्यास्तयोर्मुक्तानि जघ्नतुः॥११॥ ते हन्यमानाः स
मरे विष्णुना विद्रुता दिशः॥ दानवान्विद्रुतान्वीक्ष्य विष्णुना निह
तांस्तथा॥१२॥ गोलकः कूर्मपृष्ठश्च भ्रमान्नैः शक्त्या निवर्तितौ॥ संकर्षणं
गोलकश्चानिर्जघान त्रिभिः शरैः॥१३॥ अनंतव्यथितं दृष्ट्वा त्वात्रेयो
तीव विह्वलः॥ त्वष्ट्रास्ति संकर्षणाया तु ब्रह्मघ्नीयो तु संहृयं॥१४॥ शापं

ततस्तदा दृष्ट्वा गोलकः क्रोधमूर्छितः। उत्पत्य तरसा मूर्द्धि दुर्वासस
मताडयत्॥१५॥ समुष्टिघातान्निहतः प्राक्रोशत् पतितो क्षितौ। सं
कर्षणस्तं पतितं मुष्टिमूर्ध्नि ताडयत्॥१६॥ दृष्ट्वा तु कोपन्नगवांस्ति
ष्ठ तिष्ठेति चाब्रवीत्। सगृह्य मुसलं वीरो जघान समरे रिपुं॥१७॥
अनीके दशसाहस्रैः कूर्मपृष्ठस्य निर्ययौ। अयुतेन रथानां च नागा
नामयुतेन तथा॥१८॥ दशायुतानि चाश्वानां महासुरपरिग्रहः। बक
स्य निर्ययौ दैत्यो बहुसैन्यसमन्वितः॥१९॥ तथा दीर्घनखो दैत्यः से
नानीकेन संवृतः। सुनुकर्णो महामात्यो दैत्यराजकुशस्य तौ॥२०॥
निर्ययौ विघसो दैत्यः प्रघसश्च महाबलः। ऊर्द्धबाहुश्च कशिराः क ॥२४॥
बुकश्च शंबोल्मुकौ॥२१॥ बृहद्घोषो यज्ञकोपश्च राहुर्बर्बरकस्तथा॥

मदतारथघोषेण निर्ययुर्युद्धकोविदाः॥२२॥ स्नातः शुक्लाम्बरधरः शुक्लमाल्य
विलेपितः। सुनामा वसुनामा च मंत्रिणौ बुद्धिसंमतौ॥२३॥ सेनापतिश्च
गदेष्टो भ्राता तस्य महाहनुः। एते चान्ये च बहवो दैत्याः क्रोधसमन्विताः।
२४॥ कुशः शैवस्तु महादेवं भवानीपतिमव्ययं। अर्चयामास भूतेशं परमे
ण समाधिना॥२५॥ पंचामृतैः संस्नाप्य तथा गंधैर्विलिप्य च। अर्चयामा
स दैत्येंद्रस्त्वनेककुसुमोत्करैः॥२६॥ गीतवादित्रशब्दैश्च तथा मंगलवा
द्यनैः। पूजयित्वा महादेवं ब्राह्मणान् स्वस्ति वाच्य च॥२७॥ रत्नपौणैर्भूष
यित्वा च मणिवज्रविभूषितैः। मुकुटेनार्कवर्णेन ह्यलङ्कृतस्तरो विषा
२८॥ भ्राजमानो दैत्यराजो दारुणानीव शोभिना। संनह्य तमसाबाहुः सा
रथिं समुदैक्षत॥२९॥ सुनामानं वसुं चैव मंत्रिणौ वाक्यमब्रवीत्। कश्चा

पमसुरान्हंतिकिमर्थंज्ञायतामिति॥३०॥तस्यतद्वचनंश्रुत्वारुक्मतुर्वच
नमब्रवीत्॥गतोद्विब्राह्मणःस्नातुंगोमत्यासंगमेकिल॥३१॥आगतः
प्रतिबिद्धःसदैत्यैस्तत्रमहीपते॥तेनविष्णुःसमानीतःसंकर्षणसम
न्वितः॥३२॥सोस्मान्हंतिमहाराजब्रह्मण्योजगदीश्वरः॥सुनामाउवाच॥
स्नानार्थमागतौदृष्ट्वाविष्णोसौवासुदेवसमन्वितः॥३३॥राजन्वध्याविप्रदेणकिंका
र्यंकथयस्वनः॥तस्यतद्वचनंश्रुत्वाक्रूरःक्रोधसमन्वितः॥३४॥कथंगो
कुलहंतारंनहनिष्यामिकेशवं॥एतावदुक्त्वासंक्रुद्धोययौदैत्यपति
स्तदा॥३५॥ततोवादित्रशब्दाश्चभेरीशंखसमन्विताः॥ददर्शतत्रदेवे ॥९५॥
शंसहस्रशिरसंप्रभुं॥३६॥तथाविष्णुंचक्रपाणिंदुर्वासःसमकल्मषं॥
ईश्वरांशंचतंदृष्ट्वानदंतव्योमनीश्वरः॥३७॥विष्णुमुद्दिश्यनान्सर्वान्शर

यामासदानवान्॥गजैःपर्वतसंकाशैरथैर्जलदनिःस्वनैः॥३८॥अ
श्वैर्महाजवैश्चैवपरिवव्रुःसमंततः॥ततोयुद्धंसमभवद्देवयोर्दान
वैःसह॥३९॥आच्छादितौददृशातुदैत्यैर्देवगणास्तथा॥ततोगदांवासु
देवोहलंचबलवान्बली॥४०॥जघानदैत्यप्रवरान्कालांतकय
मोपमान्॥तेहन्यमानादैत्याबलेनबलशालिना॥४१॥सर्वतोवि
द्रुतानग्नाःप्रजग्मुःकरान्निवचाश्वचक्रश्चयज्ञकोपश्चब्रह्मघ्नोवेददू
षकः॥महानुरवःस्वजनकोरादुर्यज्ञशिरस्तथा॥एतेचान्येचबहवः
प्रवरादानवोत्तमाः॥४२॥क्रोधसंरक्तनयनाविनिद्रुस्तेजनार्दनौ॥त
तःकोपसमाविष्टौसंकर्षणजनार्दनौ॥४३॥चक्रलांगलघातेनजं
घ्नतुर्दानवर्षभान्॥चिच्छेदवासुदेवश्चक्रेणकायाच्चक्रेणवैशिरः॥४४॥चू

र्पयामास मुशलाग्रौ यज्ञदंतारमेव च ॥ शरादुं जघान चक्रेण तथान्यान्मुश-
लेन च ॥४७॥ हतास्तेष्वन्यमानाश्च नग्ना जग्मुर्दिशो दश ॥ क्रूराः स्वावा-
दिनी दृष्ट्वा विद्रुतां विद्रुतां तया ॥४८॥ क्रोधसंरक्तनयनो पादिपाद-
ति सारथिं ॥ स तयोरंतिकं दृष्ट्वा नाम विश्राव्य चात्मनः ॥४९॥ उवाच क-
श्चिद्देत्येयात्र मम दंसि गदाधरो वासुदेव उवाच ॥ यस्माद्विष्णुपदं पुण्यं
जो मन्तुदं धिसे गमौरुद्धं सदुरात्मन्निः पापैस्तस्मात्वं निहतामया ॥ क्रु-
द्धाउ ॥ मां न जानि वात्र स्थे कथं जीवन्गमिष्यसि ॥ युध्यस्व च स्थिरो भू-
वा ततस्त्वच्छसि जीवितं ॥ इत्युक्त्वा पंचविंशत्या ताडयामास केशवं ॥ ॥५१॥
५२॥ अत्रनं ते चाप्यन्निबाणैर्द्वात्रिंशत्तिरीक्षते ॥ उग्ररौद्रांश्च ततमच्युता
विप्रत्वं यादि मा चिरं ॥५३॥ स बाणैस्त्रिन्त सर्वांगः शार्ङ्गिं द्विधनुषां

वरं ॥ विच्छिप्य घातयामास चतुर्भिश्च तुरोद्धयान् ॥५४॥ सारथेश्च शिरः
कायात् शरेणैकेन चिच्छिदे ॥ धनुश्चैकेन चिच्छेद ध्वजमेकेन पत्रिणा
॥५५॥ स छिन्नधन्वा विरथो हतसारथिवाहनः ॥ प्रगृह्य च महाखड्गमु-
दाच वचनं तदा ॥५६॥ यदि त्वं पातयिष्यामि कीर्तिर्मे च अतुलां भवे-
त् ॥ पातितो दैत्य या वीरयास्यामि परमां गतिं ॥५७॥ तिष्ठ तिष्ठेति दैत्यस्य
नं चारणं मे सहसा शिवाधावेत मतिसंरब्धौ खड्गहस्तो तदा रिपुः ॥५८॥ च-
क्रेणुग्रात धारेण शिरश्चिच्छेद लीलया ॥ ते छिन्नशिरसं भूमौ पतितं
वीक्ष्य दानवः ॥५९॥ अपोवाह द्रुपेनाजौ दैत्यः खेजकस्तथा ॥ अप-
याते कुशौ दैत्ये विष्णुः संकर्षणस्तथा ॥६०॥ दुर्वासिसा च सहिताः सं
न्यवर्त्तत हर्षिताः ॥ शिवालये उपतिते कुशौ निहिप्य दानवाः स्नान

गंधर्वैर्नैर्धूर्दिगीतवाद्यैश्च तोषयन् । अवाप्य जीवितं सद्यः प्रसाद
ठंकरस्य च ॥ ६२ ॥ उत्थितः स तदा दैत्यो ब्रुवन् शिव शिवेति च । ते पुन
र्जीवितं दृष्ट्वा दैत्यं दैत्यगणास्तथा ॥ ६३ ॥ उवाच सुमना वाक्यं वर्द्धस्व
सुचिरं चिरं । स्नापयित्वा यदि तु न ब्राह्मणं विनिवर्तयेत् ॥ ६४ ॥ यद्येष
गच्छेत्तदा किं वध्या विग्रहेण ते । तस्य तद्वचनं श्रुत्वा क्रुद्धो वचनमब्र
वीत् ॥ ६५ ॥ गत्वा प्रेषयते पापो विप्रत्राणकराबुभौ । स च राज्ञा समा
दिष्टः सुमना मे त्रिसत्तमः ॥ ६६ ॥ उवाच विह्वमानम्य नमस्कृत्य दत्तो
सुधांकुरोन प्रेषितश्चास्मि तव पार्श्वे जनार्दन ॥ ६७ ॥ कितवापत्रते
नाम येन दैत्यान् जिघांससि । दुर्वाससं स्नापयित्वा गत्वा मुक्तोसि माध ॥ ६९ ॥
व ॥ ६८ ॥ श्रीरत्नं महादेवात्प्राप्तं विद्धि कुरोन हि । श्रीभगवानुवाच मुक्तितीर्थ

मिदं रुद्धं भवद्भिः पापकर्मभिः । तस्माद्गतिष्यसे सर्वान् हि दानवानात्र
संशयः ॥ भगवन् यद्भवीषि त्वं सुमना वाक्यमब्रवीत् ॥ ७० ॥ दुर्वास
सस्य वैदंतीकित्वाश्चैवासेतेः सदा पुनः स्नात्वानयद्धदिप्रहित्वाव
रुणालये ॥ ७१ ॥ स चाहं न परीवाराः पुत्रज्ञातिसबांधवाः । पुण्यतीर्थ
मिमं त्युक्त्वा प्रविशाद्य धरातले ॥ ७२ ॥ सुमनास्तद्वचः श्रुत्वा क्रोधसं
रक्तलोचनः । युध्यस्वमिति ते चोक्त्वा नैतदेवं न विष्यति ॥ ७३ ॥ कुरुग
यकथयामास यद्युक्तं शार्ङ्गधन्विना । क्रुधस्तद्वचनं श्रुत्वा मंत्रिण
समुद्दीरितं ॥ ७४ ॥ रथमारुह्य वेगेन ययौ योद्धुमरिंदमः । संस्मृत्य म
न सा देवं पिनाकिवरध्वजं ॥ ७५ ॥ ततः प्रवर्तितं युद्धं सुमदधो
महद्भलं । अन्येषां दानवानां च कृत्वा वस्य कुरास्य च ॥ ७६ ॥ यद्युध्यो

गदयागुर्व्यासंकर्षणमताडयत्॥संकर्षणेहतःशीघ्रंमुशलेनप
पातह ॥७७॥ कथंचैवजघानासुरास्त्रेणभगवान्हरिः भूषिका
दृश्यनिहतोनचभक्षोचपातितः ॥७८॥ एतेचान्येचबहवोघातिताके
शवेनहि दानवनान्निहतान्दृष्ट्वाक्रुद्धः परमकोपनः ॥७९॥ ज
घानबुद्धिसंरब्धः परमास्त्रेणकेशवो भगवान्क्रोधसंयुक्तः चक्रे
णप्राहरच्छिरः ॥८०॥ तच्छिन्नशिरसंभूमौपतितंविक्ष्यकेशवः चि
छेदबाहूपादौ च षंडितांस्तिलशस्तथा ॥८१॥ षंडशोघातितंदृष्ट्वा
केशवेनकुशोतदा संगृह्यतेपुनर्दैत्यान्निन्युः सर्वशिवालये ॥८२॥ ।।१९८।।
प्रसादाच्छूलिनःसद्योजीवितंप्राप्यदानवः उच्छ्रितःसहसाक्रुद्धःक
विष्णुरितिचाब्रवीत् ॥८३॥ गदामुद्यम्यसक्रुद्धोयोद्धुमायाज्जनार्द

नं तमुद्यतगदंदृष्ट्वानिहतंजीवितंपुनः ॥८४॥ दुर्वाससमयोवाच
किमिदंक्रियतेनयत ॥ मयासन्नच्छिरश्छिन्नंखंडशस्तिलशःकृतः ।
जीवत्ययंपुनः कस्मात्कारणंकथयस्वनः ॥८५॥ इत्युक्तःचिंतया
मासध्यानेनऋषिसत्तमः ज्ञातवान्कारणंसर्वमुवाचमधुसूदनं ।
॥८६॥ महादेवेनक्षेमेनकुशोयममरःकृतः खंडशोपिहतस्त
स्मान्नचप्राणैर्वियुज्यते ॥८७॥ ततश्चक्रधराविस्मयाविष्टोहतवीर्य
कथंमयाउपायंतंकरिष्यामियेनायंनभवेदिति ॥८८॥ ततःस
जीवितंप्राप्यप्रसादाच्छंकरस्यचखड्गचर्मतथादायतिष्ठतिष्ठेति
चाब्रवीत् ॥८९॥ तमायान्तंपुनर्दृष्ट्वाकुशंशिवपरिग्रहंजघान
गदयागुर्व्यागदादस्ततदाकुशं ॥९०॥ सच्छिन्नमूर्द्धान्यपतत्केशव

नाभिताडितः ॥ तं भूमौ पतितं वेगात् परिगृह्य कुशोदरि ॥ १८ ॥ गर्ते
निक्षिप्य तद्देहं पूरयामास वै पुनः ॥ लिंगं संस्थापयामास तस्योपरि
जनार्दनः ॥ १९ ॥ स लब्धसंज्ञो दनुजः शिवलिंगमपश्यत ॥ आत्मोप
रि स्थितं देवं दृष्ट्वा चिंतापरोऽभवत् ॥ इति श्रीद्वारकामाहात्म्ये विंशो
ध्यायः ॥ ७ ॥ ॥ प्रह्लाद उ० ॥ शिवलिंगमलंघ्याद्विबुद्धिपूर्वं हतो ह्यहं ॥
उवाच स तं दनुजश्छलितोऽहं त्वयानघ ॥ १ ॥ विष्णुरु० ॥ परितुष्टोस्मि दैत्ये
न्द्रो येन शिवस्याश्रयात् ॥ वरं वरय भद्रं ते यदिच्छसि महामते ॥ २ ॥
कुशाद उ० ॥ यथा प्रज्योम हादेवो मम वै चयपादरे ॥ एक एवाद्य याम्यति
रतस्त्वां प्रणमाम्यहं ॥ ३ ॥ शिवलिंगं त्वया नाथ स्थापितं यन्ममोपरि ॥ ॥ ११ ॥
मम नाम्नात द्भवतु कुशेश्वर इति विश्रुतं ॥ ४ ॥ अनुग्राह्योयदाहं तेम

म कीर्तिर्भवत्विति ॥ एवं भविष्यतीत्युक्त्वा तत्र चावस्थितोऽसुरः ॥ ५ ॥ त
तोऽन्यान्दानवान्सर्वान्शिक्षयामास माधवः ॥ रसातलं गताः के चि
त्के चिद्विष्णुं समाश्रिताः ॥ ६ ॥ अनंतश्चास्थितस्तत्र विष्णुस्वतनेतरं ॥
ज्ञात्वा विमुक्तिदं तीर्थं दुर्वासा मुनिसत्तमः ॥ ७ ॥ गोमती चक्रतीर्थे च
न्नगवांस्त्रिविक्रमः ॥ तेनेदं मुक्तिदं मत्वा दुर्वासा तत्र संस्थित ॥ ८ ॥
एवं त्रिविक्रमः स्वामी यदा प्रभृति संस्थितः ॥ कलौ पुनः कलान्यासा
न्नूनं च मगमत्प्रभु ॥ ९ ॥ प्रह्लाद उ० ॥ विशेषात्फलदः प्रोक्तः पूजितो मधु
माधवे ॥ मधुसूदनो नरो यस्तु द्वारवत्यां करोति स ॥ १० ॥ पूजये च्चैव दे
वं च स्नापयित्वा विलिप्याथ गंधैश्च वाससाच्छाद्य पुष्पधूपैरनेकधा ॥
॥ नैवेद्यं च प्रदीपैश्च वतां बूलेन फलेन च ॥ आरात्रिकेण संपूज्य दंड

वत्सराणिपत्यच॥१२॥ घृतेनदीपकंदद्याद्रात्रौजागरणंतथा॥ कुर्याद्
गीतवादित्रैस्तथापुस्तकवाचनैः॥१३॥ रात्राजागरणंरात्रौसर्वान्
कामानवाप्नुयात्॥ पितृणांचाक्षयातृप्तिः॥ सफलश्चमनोरथः॥१४॥
प्रबोधवासरेप्राप्तेकार्त्तिकेद्विजसत्तमाः॥ संपूज्यतुलसीदेवेशंपरांग
तिमवाप्नुयात्॥१५॥ तथानन्तस्यसंपूज्यपवित्रारोहणेनच॥ सर्वा
कामानवाप्नोतिविष्णुलोकेचगच्छति॥१६॥ युगादिषुचसंपूज्यत्र
यनेदक्षिणोत्तरे॥ आषाढेज्येष्ठमासस्यपौर्णमादिद्वादशीषुच॥१७॥
कलौसहस्रंपूजयित्वागोमत्युदधिसंगमे॥ विमलेलोकमाप्नोति
यत्रगत्वानशोचति॥१८॥ इतिश्रीद्वारकामाहात्म्येएकविंशोध्यायः॥ ॥१००॥
२१॥ प्रह्लादउ॥ शृणुष्वद्विजशार्दूलायथावत्कथयामिवः॥ स्नापयि

त्वाजगन्नाथंतथागंधैर्विलिप्यच॥१॥ पूजयित्वातुलस्यादिपुष्प
यित्वाचभूषणैः॥ नैवेद्येनचसंतर्प्यतथानीराजनादिभिः॥२॥ दुर्वा
ससंतथाकृत्यपुंडरीकाक्षमेवच॥ गणेशावेनतथादीनस्वशक्तितः
पूज्यमानव॥३॥ दद्याद्दानेयथाशक्त्यावित्तशाठ्यविवर्जितः॥ दी
नांधकृपणांस्तत्रतर्पयेच्चसमाश्रितान्॥४॥ सकृन्निणीवततोग
छविदन्नतयानरः॥ उपाकृत्योपहारोश्चबलिर्निवेद्यदीपकैः॥५॥ पी
डयतिग्रहास्तावद्याधयोपिभवंतिच॥ नतथानपश्यतेयावत्क
लौसहस्रिधानरः॥६॥ उपसर्गान्नियंतावच्छाकिनीभूतसंभवान्
तथानपश्यतेयावत्क॥७॥ तावद्दरिद्रोदुःखीचभवतिपरयाच
कः॥ नतथानपश्यतेयावत्क॥८॥ तावन्मृतप्रजानारीदुर्भगादुः

खसंयुता॥ यावन्नपठ्यते तन्नस्या कलौ सहस्रप्रियां द्विजाः॥९॥ तवद्भुयं
च पुंसां द्विरदनगं च मूर्खता॥ यावन्नपठ्यते तन्नस्या कलौ सहस्रप्रि
यो नरः॥१०॥ संपूज्य सहस्रं विधिवत्ततो गंधैश्च रुक्मिणीं॥ स्नापयेत्द
धि दुग्धेन मधुशर्करया तथा॥११॥ घृतेन विविधैर्गंधैस्तथा इक्षुर
सेन च॥ तीर्थोदकेन संस्नाप्य सर्वान्कामानवाप्नुयात्॥१२॥ एवं यः
स्नापयेद्देवीं रुक्मिणीं सहस्रवर्द्धनात्॥ न तस्य दुर्लभं किंचिदिह लो
के परत्र च॥१३॥ श्रीखंडकुंकुमेनापि तथा मृगमदेन च॥ विलेप
येद्पुत्रवंश्च धनवृंनपठ्यति॥१४॥ सदा स रोगी भवति रूपवा ॥१०१॥
न्जनरंजकः॥ पूजयेन्मालतीपुष्पैः शतपत्रैः सुगंधिभिः॥१५॥
करवीरैर्मल्लिकाभिस्तुलस्या राजचंपकैः॥ कमलैर्वारिसंभूतैः

केतकीभिस्त्रपाटलैः॥१६॥ धूपयेत्गागरुणा चैव धूपयेद्गुग्गुलेन च॥ व
स्त्रैः सुकोमलैः शुभ्रैर्नानादेशसमुद्भवैः॥१७॥ नैवेद्यासद्घृतैर्दन्नं
रुक्मिणी सहस्रवर्द्धनात्॥ भूषणैर्भूषयेद्देवीं माणिरत्नविभूषणैः
॥१८॥ तस्मिन्कुले न चासुखे स्यान्नापुत्रो नाधनस्तथा॥ पतितो न।
विकर्मस्थः कितवो नीचसेवकः॥१९॥ संपूजिता जगन्माता रुक्मि
णी मानवैः कलौ॥ नैवेद्यं नहं लोऽप्याधैर्देवी मेध्रीयतामिति॥२०॥ तां
बूलं च सकर्पूरं भावेन विनिवेदयेत्॥ गृहाण वा च फलैः शुभ्रैश्च सैते
स्त्र समन्विते॥२१॥ मंत्रेणानेन वै विप्राश्चार्घं दद्याद्विधानतः॥ सहस्र
प्रियेन मस्तुभ्यं विद्वन्मोऽधिपनंदिनि॥२२॥ सर्वकामप्रदे देवि गृहाणा
र्घ्यं नमोऽस्तु ते॥ आरात्रिकं ततः कुर्याद्बहुलैर्नानान्वितं॥२३॥ नी

राजन्नेव कर्त्तव्यं कर्पूरेण विशेषतः ॥ शर्करेक्षुचान्तु पानीयं भ्राम
येद्भावसंयुतः ॥ २४ ॥ भ्रामयित्वा च शिरसा धरण्यां ये विशुद्धये दंड
वत्प्रणमेद्भूमौ नमः सहस्रप्रियेति च ॥ २५ ॥ विप्रपत्नीश्च विप्रांश्च पू
जयेद्विजशक्तितः ॥ श्रीवास्त्रकंचुकस्यं दूरे वासांसि कंचुकीस्तथा ॥
२६ ॥ सुगंधकुसुमैरर्च्य कुंकुमेन विलिप्य च ॥ कौसुंभकैः कज्जलेन
तांबूलेन च तोषयेत् ॥ २७ ॥ भक्ष्यैर्भोज्यैर्मोदकैश्च इक्षुभिर्मधुसर्पि
र्भिः ॥ प्रीतो भवति देवेशो रुक्मिण्या सह केशवः ॥ २८ ॥ विशेषतः फ
लानि दद्यात् व्यानि द्विजातये उन्मत्तकं ततो देवद्वारपालं प्रपूज
येत् ॥ २९ ॥ स्नापयित्वा सुगंधेन कुंकुमेन विलिप्य च ॥ कौसुंभकैः ॥१०२॥
कज्जलेन तांबूलेन च तोषयेत् ॥ ३० ॥ भक्ष्यैर्भोज्यैर्मोदकैश्च इक्षुभि

र्मधुसर्पिर्भिः ॥ प्रीतो भवति देवेशो रुक्मिण्या सह केशवः ॥ ३१ ॥ विशे
षतः फलानि दद्यात् व्यानि द्विजातये उन्मत्तकं ततो देवद्वारपा
लं प्रपूजयेत् ॥ ३२ ॥ स्नापयित्वा सुगंधेन कुंकुमेन विलिप्य वा धू
पेन धूपयित्वा तत् पुष्पमाल्यैः प्रपूजयेत् ॥ ३३ ॥ नैवेद्यं भक्ष्यभोज्यै
श्च मांसेन सुरया तथा ॥ अक्षतबलिभिश्चैव पिष्टेन विविधेन च ॥
३४ ॥ योगिनीनां चतुःषष्टी पीठे तस्मिन् प्रपूजयेत् ॥ अर्चयेद्भूरा ॥
सिद्धिं च क्षेत्रपालांश्च सर्वतः ॥ ३५ ॥ विरूपस्वामिनी तत्र तथा वैस
प्रमातरः ॥ अष्टमूर्त्तिस्थिता पत्नी पीठे तस्मिन् प्रपूजयेत् ॥ ३६ ॥
रुक्मिणी सत्यभामा च देवी जांबुवती तथा ॥ मित्रविंदा च कालिं
दी लक्ष्मणा नाग्नजितिस्तथा ॥ ३७ ॥ संपूज्या लक्ष्मणा तत्र वैष्णवाः

ल्लक्ष्मवल्लभाः। एता संपूज्य विधिवत्संतर्प्य दधिपायसैः॥४३॥ गी
तवादित्रघोषैश्च दीपजागरणेन च। सर्वान्कामानवाप्नोति या
त्रादिसफलान्नवेन॥४४॥ पुत्रपौत्रसमायुक्तो धनधान्यसम
न्वितः। सर्वान्कामानवाप्नोति तस्य विष्णुः प्रसीदति॥४५॥ जीवते
व्याधिनिर्मुक्तो ऋद्धिवृद्धिसमन्वितः। किं तस्य बहुभिर्दानैः किं व्रतै
र्नियमैस्तथा॥४६॥ येन दृष्टा जगन्माता रुक्मिणी लक्ष्मवल्लभा
किं यज्ञैर्बहुभिस्तस्य समाप्तवरदक्षिणैः॥४७॥ येन दृष्टा महामा
या रुक्मिणी लक्ष्मवल्लभा तेन दत्तं हुतं तेन जप्तं ब्रह्म सनातनं। ॥१०३॥
४८॥ यैर्न दृष्टा जगन्माता रुक्मिणी लक्ष्मवल्लभा हिलयातिनसं
प्राप्ता सिद्धयो ह्येन संशयः॥४९॥ गत्वा द्वारवतीं येन दृष्टा केशव

वल्लभा। सफलं जीवितं तस्य मानुष्यं जन्म एव च॥५०॥ कलौ त्र
ष्ठपुरीं गत्वा दृष्टा माधववल्लभा। सदार्चनीया मनुजैर्दृष्ट्वा स
र्वकामदा॥५१॥ विशेषतः पूजनीया नवरात्रे सदाश्विने। नवम्यां
तु नरैर्येस्तु पूजिता हरिवल्लभा॥५२॥ स्नानगंधादिवस्त्रैश्च पूज्य
ते बलिभिस्तथा। गीतवादित्रघोषैश्च दीपजागरणेन च॥५३॥ तो
षिता भीष्मकसुता सर्वान्कामान्प्रयच्छति। माघमासे सिताष्ट
म्यां कंदर्पजननी च या॥५४॥ पूजिता गंधपुष्पाद्यैरुपहारैरनेकधा।
सफलं जीवितं तेषां सफलाश्च मनोरथाः॥५५॥ द्वादश्यां चैत्रमास
शुक्लपक्षेन सह रुक्मिणी। ये पश्यंति नरा देवीं रुक्मिणीं मधुमाधवप्र।
लक्ष्मेन सहगच्छति ते धन्या मानवा भुवि। पुत्रपौत्रसमायुक्ता धन

धनधान्यसमन्विताः ॥५२॥ जीवंते व्याधिनिर्मुक्ताः पदं गच्छंत्यनामयं ।
ज्येष्ठश्रम्यां नरैर्यैस्तु पूजिता सहस्रवत्सरान् ॥५३॥ तेषां मनोरथा वा
ञ्छितान्वर्त्तते नात्र संशयः । तस्मान्नारद रूपदं मासि तं तु पूजान्तां तु ये ॥
५४॥ सर्वपापविनिर्मुक्ता यांति विष्णुपदं नराः । कार्त्तिके शुक्लद्वाद
श्यां रुक्मिणीसहस्रसंयुता ॥५५॥ सफलं जीवितं तस्य श्रद्धया पु
त्रसंततिः । पुष्कलं धनधान्यं च कदा नैव दरिद्रता ॥५६॥ एवं यो रु
क्मिणीं पश्येत् पूजयेत्सहस्रवत्सरान् । सर्वपापविनिर्मुक्तो विष्णुलो
कं स गच्छति ॥५७॥ इति श्रीद्वारकामाहात्म्ये रुक्मिणीमाहात्म्यं ना ॥१०४॥
म द्वाविंशोऽध्यायः ॥ ॥छ॥ ॥ प्रह्लाद उ ॥ अथान्यदपि वक्ष्यामि गु
ह्याद्गुह्यतरं द्विजाः । द्वारकायाः परं पुण्यं माहात्म्यं श्रुतमोत्तमं ॥१॥

इतिहासं पुरावृत्तं वर्त्तयिष्ये मनोहरं । तीर्थक्षेत्रादिदेवानां ऋषीणां संश्रयं ।
